CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.16

Coll. No. 801

Title Śaṅkaravijayaḍiṇḍima

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 801 Subject: Kāvya.

Title: Śankaravijayadindima.

Author: Dhanapati Scribe: –

Date of the work: – Date of the Ms.: –

Place of the work: – Place of the Ms.: –

Size: 12·3" by 6·9" Extent: 11 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: ______

॥ श्री० ॥ एवंदिग्विजयकौतुकंप्रतिपाद्यशारदापीठवासंसपरिकरंनिरूपयितुमारभते अथानुत्तमंमांत्रिकमभिनवगुप्तंयतिशेखरोय
स्मिन्कालेजितवांस्तस्मिन्कालेसतुपराजितोहतमनायतिविषयमपगोरणंवधोद्यमंकृतवान् द्रुतवि० ॥ १ ॥ समूढबुद्धिःप्ररूढकोपोऽभिन
वगुप्तस्तदनंतरंयतिशेखरमभिचचाराभिचारिकंकर्मकृत्यांकृतवान् अस्मादभिचारादस्यश्रीशंकरस्यवैद्यैरचिकित्स्यतमोभगंदराख्योरोगः अ

श्री० ॥ अथषोडशःसर्गः ॥ अथयदाजितवान्यतिशेखरोऽभिनवगुप्तमनुत्तममांत्रिकं॥ सतुतदापजि
तोयतिगोचरंहतमनाःकृतवानपगोरणं ॥ १ ॥ सततोऽभिचचारमूढबुद्धिर्यतिशार्दूलममुंप्ररूढरोषः ॥ अ
चिकित्स्यतमोभिषग्भिरस्माद्जनिष्टास्यभगंदराख्यरोगः ॥ २ ॥ अचिकित्स्यभगंदराख्यरोगप्रसरच्छो
णितपंकिलस्वशाट्याः ॥ अजुगुप्स्यविशोधनादिरूपांपरिचर्यामकृतास्यतोटकार्यः॥ ३॥ भगंदरव्याधिनि
पीडितंगुरुंनिरीक्ष्यशिष्याःसमबोधयंश्छनैः ॥ नोपेक्षणीयोभगवन्महामयस्त्वपीडितःशत्रुरिवर्धिमाप्नुया
त् ॥ ४ ॥ ममत्वहानाद्भवताशरीरकेनगण्यतेव्याधिकृतार्तिरीदृशी ॥ पश्यंतएवांतिकवर्तिनोवयंभृशातु
राःस्मःसहसाव्यथासहाः॥ ५॥

जनिष्ट वसंतमालिका ॥ २ ॥ अचिकित्स्येनभगंदराख्यरोगेणप्रसरत्शोणितस्यपंकेनव्याप्तायाआचार्यशाट्याः अजुगुप्सपरिशोधनादि
रूपांसेवांतोटकार्यःकृतवान् ॥ ३ ॥ हेभगवन्महारोगस्तूपेक्षणीयोनभवति नोचेदपीडितःशत्रुर्यथावृद्धिमाप्नोतितथावृद्धिप्राप्नुयात् उ० ॥
॥ ४॥ यद्यपिशरीरकेममत्वहानात्भवताएवंविधापिरोगकृतापीडानगण्यते तथापिसमीपवर्तिनःपश्यंतएवसहसाव्यथाऽसहाःभृशार्त्ताःस्मः ५॥

तर्हिकिंकर्त्तव्यमितितत्राहुश्चिकित्सकाइति संप्रतिजीवातुवेदेजीवनौषधवेदेवैदिकशास्त्रे जीवातुरस्त्रियांभक्तेजीवितेजीवनौषधइतिमेदिनी ग
दितार्थसिद्धिदाउक्तार्थसिद्धिदाःपुरुषाःप्रत्यक्षवत्संति ॥ ६ ॥ ननुयथामयोपेक्ष्यतेतथाभवद्भिरप्युपेक्षणीयमित्याशंक्याहुः शरीरकादाव
नास्थयागुरावात्मनिसुखमुपेक्षमाणेसत्यपिगुरुदुःखदर्शिभिःसमर्थैःशिष्यैर्नोपेक्षणीयमितिशास्त्रनिश्चयः ॥ ७ ॥ किंच स्वस्थेभवत्पादसरो

चिकित्सकाव्याधिनिदानकोविदाःसंपृच्छनीयाभगवन्नितस्ततः ॥ प्रत्यक्षवत्संप्रतिसंतिपूरुषाजीवातुवेदे
गदितार्थसिद्धिदाः ॥ ६ ॥ उपेक्ष्यमाणेऽपिगुरावनास्थयाशरीरकादौसुखमात्मनीश्वरैः ॥ नोपेक्षणीयंगुरुदुः
खदृश्विभिर्दुःखंविनेयैरितिशास्त्रनिश्चयः ॥ ७ ॥ स्वस्थेभवत्पादसरोरुहद्वयेस्वस्थावयंयन्मधुपायिवृत्तयः ॥
तस्माद्भवेत्तावकविग्रहोयथास्वस्थस्तथावांछतिपूज्यनोमनः ॥ ८ ॥ व्याधिर्हिजन्मांतरपापपाकोभोगेनत
स्मात्क्षपणीयएषः ॥ अभुज्यमानःपुरुषंनमुंचेज्जन्मांतरेपीतिहिशास्त्रवादः ॥ ९ ॥ व्याधिर्द्विधाऽसौकथि
तोहिविद्भिःकर्मोद्भवोधातुकृतस्तथेति ॥ आद्यक्षयःकर्मणएवलीनाच्चिकित्सयास्याच्चरमोदितस्य ॥ १० ॥

जद्वंद्वेवयंस्वस्थायत्रपादसरोरुहद्वयभ्रमराणांवृत्तिर्येषांतस्मात्तावकविग्रहोयथास्वस्थोभवेत्तथाहेपूज्यास्माकंमनोवांछति वंश० ॥ ८ ॥
एवंशनैर्बोधितआचार्यउवाच हियस्माद्रोगोजन्मांतरपापस्यपाकस्तस्मादेषोभोगेननाशनीयोहियतश्चाभुज्यमानएषांजन्मांतरेऽपिनत्यजे ॥१॥
दितिशास्त्रवादः ॥ ९ ॥ नन्वेवंतर्हिचिकित्साशास्त्रवैयर्थ्यमितिचेत्तत्राह विद्वद्भिरसौव्याधिर्द्विप्रकारएवकथितः कर्मोद्भवोवाताम्रादिधातु
भिःकृतश्चतत्रकर्मणोलीनादेवाद्यस्यक्षयःचरमोक्तस्यचिकित्सयाक्षयःस्यात् ॥ १० ॥

तर्हिधातुकृतत्वाच्चिकित्सयानाशनीयइतिचेत्तत्रायंप्रवृत्तोव्याधिःकर्मणएवसंक्षयात्संक्षीयतां मयानैवचिकित्स्यते तर्हिरोगवशाच्छरीरं
पतिष्यतीत्याशंक्याह यदितन्निमित्ततःशरीरंपतेत्तर्हिअवश्यंपततु तत्पतनात्किंचिदपिनबिभेमि ॥ ११ ॥ एवमुक्ताःशिष्याःप्राहुर्हेगुरोसत्यं
तवशरीरलोभोनास्तितथाप्यस्माकंतदर्थंचिरायचिरकालंतत्स्थितयेस्पृहालुतास्ति हियस्मात्तवजीवनेननोजीवनं हियतोजलचराणांजल

संक्षीयतांकर्मणएवसंक्षयाद्व्याधिःप्रवृत्तोनचिकित्स्यतेमया ॥ पतेच्छरीरंयदितन्निमित्ततःपतत्ववश्यंनबि
भेमिकिंचन ॥ ११ ॥ सत्यंगुरोतेनशरीरलोभःस्पृहालुतानस्तुचिरायतस्मै ॥ त्वज्जीवनेनैवहिजीवनंनःपाथ
श्चराणांजलमेवतद्धि ॥ १२ ॥ स्वयंकृतार्थाःपरतुष्टिहेतोःकुर्वंतिसंतोनिजदेहरक्षां ॥ तस्माच्छरीरंपरिरक्षणी
यंत्वयापिलोकस्यहितायविद्वन् ॥ १३ ॥ निर्बंधतोगुरुवरःप्रददावनुज्ञांदिग्भ्योभिषग्वरसमानयनायतेभ्यः ॥
नत्वागुरुंप्रतिदिशंप्रययुःप्रहृष्टाःशिष्याःप्रवासकुशलाहरिभक्तिभाजः ॥ १४ ॥ प्रायोनृपंकविजनाभिष
जोवदान्यंवित्तार्थिनःप्रतिदिनंकुशलाजुषंते ॥ तस्मादमीनृपपुरेषुनिरीक्षणीयाइत्येवचेतसिमनोरथमाद
धानाः ॥ १५ ॥ तेऽतीत्यदेशान्बहुलान्स्वकार्यसिद्ध्यैक्वचिद्राजपुरेभिषग्भिः ॥ अवाप्यसंदर्शनभाषणानि
समानयंस्तान्गुरुवर्यपार्श्वे ॥ १६ ॥

मेवतत्जीवनं ॥ १२ ॥ भवत्वेवंतथापिमयानिजदेहरक्षाकिमितिकर्त्तव्येत्याशंक्याहुः स्वयमिति ॥ १३ ॥ एवंशिष्याणामाग्रहाद्गुरुव
रोदिग्भ्योवैद्यवराणांसमानयनार्थंतेभ्यःशिष्येभ्योऽनुज्ञांप्रददौ व० ॥ १४ ॥ वदान्यमुदारंजुषंतेसेवंते ॥ १५ ॥ गुरुवर्यसमीपंतान्भिषजः
समानीतवंतः उ० ॥ १६ ॥

ततोनिजसेवकैः स्वाभिमतार्थदानैःसंतोषितान्यदत्रकर्त्तव्यंतत्कथ्यतांस्वशक्त्याकुर्मःइतिभाषमाणांस्तान्सगुरुवरोजगौ ॥ १७ यदुवाचतदा
ह हेभिषजोगुदसमीपेतनुमध्यगोगदोरोगउदेत्यशरीरंपरिबाधते यदिदमस्यरोगस्यविधेयमौषधंतदिदंध्रुवमव्यभिचारिवदत यतोरोगतमस्ति
मिरारयः उ० ॥ १८ ॥ नन्वेवंभूतोरोगएतावत्कालंकिमित्युपेक्षितस्तत्राह चिरमिति तदपितथापिशिष्यगणैरहंनिरहंसिअत्याग्रहेणनि

ततोद्विजेंद्रैर्निजसेवकैस्तान्संतोषितान्स्वाभिमतार्थदानैः॥ यदत्रकर्तव्यमुदीर्यतांतत्कुर्मःस्वशक्त्येतिवदान्
जगौसः ॥ १७ ॥ उपगुदंभिषजःपरिबाधतेगदउदेत्यतनुंतनुमध्यगः ॥ यदिदमस्यविधेयमिदंध्रुवंवदतरो
गतमस्तिमिरारयः ॥ १८ ॥ चिरमुपेक्षितवानहमेतकंदुरितजोयमितिप्रतिभातिमे ॥ तदपिशिष्यगणैर्नि
रहिंस्यहंप्रहितवान्भवदानयनायतान् ॥ १९ ॥ निगदितेमुनिनेतिभिषग्वराविदधिरेबहुधागदसत्क्रियाः॥
नचशशामगदोबहुतापदोविमनसःपटवोभिषजोभवन् ॥ २० ॥ अथमुनिर्विमनस्त्वसमन्वितानिदमवोच
तसिद्धभिषग्वरान् ॥ अटतगेहमगात्समयोबहुर्गदहृतेभवतामितरायुषां ॥ २१ ॥ दिनचयंगणयन्पथिलोच
नःप्रियजनोनिवसेद्विरहातुरः ॥ नरपतिर्भवतांशरणंध्रुवंसचविदेशगमंश्रुतवान्यदि ॥ २२ ॥ रुषितवान्नचवो
वितरेन्नृपःफणितजीवितमक्षतशासनः ॥ तुरगवन्नृपतिश्चलमानसोभिषजमन्यमसौविदधीतवा ॥ २३ ॥

योजितत्वाद्विसितः ॥ १९ ॥ इत्येवंमुनिनाकथितेसतिवैद्यवरारोगस्यसत्क्रियाबहुधाविदधिरे ॥ २० ॥ इतोगेहमटतगच्छत यतोरोग
हरणार्थइतआगतानांभवतांकालोमहानगात् ॥ २१ ॥ अवश्यमेवभवद्भिर्गतव्यमित्यनुशयेनाह विरहातुरःप्रियजनःपथिलोचनोदिनसमुदा
यंगणयन्निवसेदितिसंभावनायांलिङ् किंच नरपतिर्भवतांध्रुवंशरणंसचभवतांविदेशगमनंयदिश्रुतवान् ॥ २२ ॥ तदाकुपितःसन्नृपःकथितं
जीवितंप्रतिज्ञातांजीविकांयुष्मभ्योनदद्यात् यतोऽक्षतशासनःयद्वायस्मादश्ववन्नृपतिश्चलमानसस्ततोसावन्यंवैद्यंविदधीत ॥ २३ ॥

किंचरोगहारकैर्विरलोरहितोजनपदः स्वभावादेवबहुलंरुग्णाःजनायस्मिन् अतोरोगिजनोरोगंसहितुमसमर्थोभवतांगृहेभवतोविचिनुते
॥ २४ ॥ जनिर्जन्मअवनंपालनंतस्मादसौवैद्यःशरीरभृतोविष्णुरेवतद्वदुपासनीयइत्यर्थः ॥ २५ ॥ एवमुक्ताभिषजऊचुः भवताय
त्कथितंतन्मिथ्यानभवति तथापिगंतुंमनोनक्षमतेयतोदेवभूमिंप्रविहायमनुष्यभूमिंगंतुंसुधीर्नरोऽत्रजगतिकइच्छतिनकोपीत्यर्थः ॥ २६ ॥ इ

जनपदोविरलोगदहारकैर्बहुलरुग्णजनःप्रकृतेरतः ॥ मृगयतेभवतोभवतांगृहेगदिजनःसहितुंगदमक्ष
मः ॥ २४ ॥ पितृकृताजनिरस्यशरीरिणःसमवनंगदहारिपुतिष्ठति ॥ जनितमप्यफलंभिषजंविनाभिषग
सौहरिंवतनूभृतः ॥ २५ ॥ यदुदितंभवतावितथंनतत्तदपिनक्षमतेव्रजितुंमनः ॥ सुरभुवंप्रविहायमनु
ष्यगांव्रजितुमिच्छतिकोत्रनरःसुधीः ॥ २६ ॥ इतिनिगद्ययुर्भिषजांगणाविमनसःपटवोऽपिनिजान्गृ
हान् ॥ अथमुनिर्विजहन्ममतांतनौगुरुवरोगुरुदुःखमसोढसः ॥ २७ ॥ प्रथितैरवनौपरःसहस्रैरगदंकारच
यैरथाचिकित्स्ये ॥ प्रबलेसतिहाभगंदराख्येस्मरतिस्मस्मरशासनंमुनींद्रः ॥ २८ ॥ स्मरशासनशासना
न्नियुक्तौद्विजवेषंप्रविधायभूमिमाप्तौ ॥ उपसेदतुरश्विनौचदेवौसुभुजौसांजनलोचनौसुपुस्तौ ॥ २९ ॥

तिनिगद्यैवमुक्त्वा ॥ २७ ॥ भूमौप्रथितैःसहस्रादप्यधिकैरौषधंकारसमूहैर्भगंदराख्येप्रबले हेऽनिर्वेदेऽचिकित्स्येसतिमुनींद्रःश्रीशंकराचार्यः
कामशासनंमहादेवंस्मरतिस्म व०मा० ॥ २८ ॥ स्मृतमहादेवाज्ञयानियुक्तौदेवावश्विनीकुमारौद्विजवेषंप्रविधायभूमिंप्राप्तौसुभुजौसांज
नलोचनौसुपुस्तकयुक्तौमुनींद्रसमीपेविविशतुः ॥ २९ ॥

उपविश्ययद्रूचतुस्तदाह भोयतिवर्यएषातेरुक्रोगःचिकित्सितुंनशक्या ह्रियस्मात्परकृत्यथाउत्पादिताइति तंयोगिवर्यंसमुदीर्यतौदेवौ यथागतंप्रतिजग्मतुः ॥ ३० ॥ तदनंतरंजातकोपःशत्रुवर्गेप्यनुकंपिनाआर्यपादेनाचार्येणमुहुर्वार्यमाणोऽपिपद्मपादःस्वगुरोरोगस्यनाशाय परंमंत्रंतुजजाप ॥ ३१ ॥ ततःकिंवृत्तमित्याकांक्षायामाह अमुनैवेति प्रतियातेनप्रतिभ्रामेन ॥ ३२ ॥ स्वस्थःसोयंश्रीशंकराचार्यःसैकतेसा

यतिवर्यंचिकित्सितुंनशक्यापरकृत्याजनिताहितेरुगेषा ॥ इतितैःसमुदीर्ययोगिवर्यंविबुधौतौप्रतिजग्म
तुर्यथेतं ॥ ३० ॥ तदनुस्वगुरोर्गदापनुत्यैपरमंत्रंतुजजापजातमन्युः ॥ मुहुरार्यपदेनवार्यमाणोऽप्यरिवर्गे
प्यनुकंपिनाब्जपादः ॥ ३१ ॥ अमुनैवततोगदेननीचःप्रतियातेनहतोममारगुप्तः ॥ मतिपूर्वकृतोमहानुभा
वेप्यनयःकस्यभवेत्सुखोपलब्धौ ॥ ३२ ॥ स्वस्थःसोयंब्रह्मसायंकदाचिद्ध्यायन्गंगापूरसंगार्द्रवातैः ॥ आ
गच्छंतंसैकतेप्रत्यगच्छद्योगीशानंगौडपादाभिधानं ॥ ३३ ॥ पाणौफुल्लश्वेतपंकेरुहश्रीमैत्रीपात्रीभूतभा
साघटेन ॥ आराद्राजत्कैरवानंदसंध्यारागारक्तांभोदलीलांदधानं ॥ ३४ ॥ पाणौशोणांभोजबुध्यासमंता
द्भ्राम्यद्भृंगीमंडलीतुल्यकुल्यां ॥ अंगुल्यग्रासंगिरुद्राक्षमालामंगुष्ठाग्रेणासकृद्भ्रामयंतं ॥ ३५ ॥

यंकालेब्रह्मध्यायन्सन्गंगापूरेणार्द्रैर्वायुभिःसहागच्छंतंयोगीशंगौडपादसंज्ञंप्रत्यबुध्यत शालि० ॥ ३३ ॥ तमेववर्णयति पाणौहस्तेप्रफु ॥३॥
ल्लितस्यश्वेतकमलस्ययाश्रीस्तयायामैत्रीतस्याःपात्रीभूताभाकांतिर्यस्यतेनघटेनकमंडलुनाआराद्राजत्कैरवस्यसितपंकजस्यानंदोयस्यतस्य संध्यारागेणासमंताद्रक्तस्यपयोदस्यचलीलांदधानं ॥ ३४ ॥ पुनश्चहस्तेशोणपद्मबुध्यासमंताद्भ्राम्यंतीभ्रमरीणांयामंडलीतत्तुल्यकुलोद्भवां तत्सदृशांअंगुल्यग्रासंगिरुद्राक्षमालांपुनःभ्रामयंतं ॥ ३५ ॥

अथानंतरमार्यस्यगौडपादस्यपंकजाभौपादावसौशंकरोभ्यर्च्यभक्तिश्रद्धाभ्यांयःसंभ्रमस्तेनतैर्वाक्रांतचित्तोनम्रीभूतोअग्रतःप्रांजलिःसन्नव तस्थे ॥ ३६ ॥ एनंशंकरंक्षीरवारिराशिसादृश्यायासन्नयनैःभ्रामयनैःकटाक्षैःसिचन्दंतज्योत्स्नयादंतुराउन्नतरदाआशादिशोऽपिधवलीकुर्वन् सुष्टूक्तिसंदधे ॥ ३७ ॥ तामेवदर्शयति कच्चिदितिप्रश्ने संसारोद्धारकारणीभूताहृदयस्यप्रियायागोविंदनाम्नोविद्यातांसर्वांवेत्सिजानासि स

आर्यस्याथोगौडपादस्यपादावभ्यर्च्यासौशंकरःपंकजाभौ ॥ भक्तिश्रद्धासंभ्रमाक्रांतचेताःप्रह्वस्तस्थावग्र
तःप्रांजलिःसन् ॥ ३६ ॥ सिंचन्नेनंक्षीरवाराशिवीचीसाचिव्यायासन्नयनैःकटाक्षैः ॥ दंतज्योत्स्नादंतुराश्चा
पिकुर्वन्नाशाःसूक्तिंसंदधेगौडपादः ॥ ३७ ॥ कच्चित्सर्वांवेत्सिगोविंदनाम्नोल्लब्धांविद्यांसंसृदुत्तारकृद्यां ॥ क
च्चित्तत्वंतत्वमानंदरूपंनित्यंसच्चिन्निर्मलंवेत्सिवेद्यं ॥ ३८ ॥ भक्त्यायुक्ताःस्वानुरक्ताविरक्ताःशांतादांताःसं
ततंश्रद्दधानाः ॥ कच्चित्तत्वज्ञानकामाविनीताश्शुश्रूषुस्तेशिष्यवर्यागुरुंत्वां ॥ ३९ ॥ कच्चिन्नित्याःशत्रवो
निर्जितास्तेकच्चित्कामाःसद्गुणाःशांतिपूर्वाः ॥ कच्चिद्योगःसाधितोष्टांगयुक्तःकच्चिच्चित्तंसाधुचित्तत्वगंते ॥
॥ ४० ॥ इत्यद्वैताचार्यवर्येणतेनप्रेम्णापृष्टःशंकरःसाधुशीलः ॥ भक्त्युद्रेकाद्बाष्पपर्याकुलाक्षोबध्नन्मूर्द्धन्यं
जलिंव्याजहार ॥ ४१ ॥

च्छास्त्रप्रसिद्धंनित्यंसच्चिदमलंवेद्यंतत्त्वंत्वंकच्चिद्वेत्सि ॥ ३८ ॥ भक्त्यासेवयायुक्ताः स्वस्मिंस्त्वयिस्वात्मनिवानुरक्ताविषयेषुविरक्तावशीकृतां तरिंद्रियाजितबाह्यकरणानिरंतरंश्रद्धावंतस्तत्त्वज्ञानाभिलाषाविनयंप्राप्ताःशिष्यवर्याःकच्चित्त्वांगुरुंसेवंते ॥ ३९ ॥ नित्याःशत्रवःकामाद्याः यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिसंज्ञकैरष्टभिरंगैर्युक्तःसाधुचित्तत्वगंसम्यक्चैतन्यतत्त्वविषयं ॥ ४० ॥ बाष्पपर्या कुलेपरिव्याप्तेऽक्षिणीयस्य ॥ ४१ ॥

हेभगवन्नार्यपादैर्यद्यत्पृष्टंतत्तत्सर्वमवश्यंस्पष्टंभविष्यति यस्मात्कारुण्यसमुद्रस्यकल्पैःसदृशैर्भवत्कटाक्षैर्दृष्टस्यजंतोःकिंनुदुर्लभंकिमपिदुर्ल भंनेत्याह ॥ ४२ ॥ एतदेवोपपादयति भवद्विधानामार्याणांकटाक्षावलोकात्क्षणमात्रेणमूकोवाग्मीस्यादेवमग्रेपि निस्पृहाणांमध्येकी र्त्तिमान् ॥ ४३ ॥ सीमातीतस्यभवन्महिम्नोलेशंवापिज्ञातुमग्यकःपुमान्समर्थोनकोपीत्यर्थः कुतइतिचेत्तत्राह यस्यभवतःसअतिप्रसिद्धो व्याससूनुःशुकाचार्योऽत्यंतंतुष्टोभूत्वासाक्षात्स्वयमेवविद्योपदेष्टाजातोऽतइत्यर्थः ॥ ४४ ॥ वैयासकिरित्युक्त्याव्यासपुत्रत्वेनैवतस्यश्रैष्ठ्यं

यद्यत्पृष्टंस्पष्टमाचार्यपादैस्तत्तत्सर्वंभोभविष्यत्यवश्यं ॥ कारुण्याब्धेःकल्पयुष्मत्कटाक्षैर्दृष्टस्याहुर्दुर्लभंकि न्नुजंतोः ॥ ४२ ॥ मूकोवाग्मीमंदधीःपंडिताग्र्यःपापाचारःपुण्यनिष्ठेषुगण्यः ॥ कामासक्तःकीर्त्तिमान्नि स्पृहाणामार्यापांगालोकतःस्यात्क्षणेन ॥ ४३ ॥ लेशंवापिज्ञातुमिष्टेपुमान्कःसीमातीतस्याद्ययुष्मन्महि म्नः ॥ तुष्टात्यंतंतत्त्वविद्योपदेष्टाजातःसाक्षाद्यस्यवैयासकिःसः ॥ ४४ ॥ आजानात्मज्ञानसिद्धंयमारादौ दासीन्याज्ज्ञातमात्रंव्रजंतं ॥ प्रेमावेशात्पुत्रपुत्रेतिशोचन्पाराशर्यःपृष्ठतोऽनुप्रपेदे ॥ ४५ ॥ यश्चाहूतोयोगभा ष्यप्रणेत्रापित्राप्राप्तःसप्रपंचैकभावं ॥ सर्वाहंताशीलनाद्योगभूमेःप्रत्याक्रोशंप्रातनोद्दक्षरूपः ॥ ४६ ॥

नास्यपितुस्ततोपीत्याशयेनतंवर्णयति यंजन्मतएवात्मज्ञानसिद्धमौदासीन्येनारात्समीपाद्दूरंवाजातमात्रंव्रजंतंप्रेमावेशात्पुत्रपुत्रेतिशोचन् पराशरनंदनोवेदव्यासःपृष्ठतोऽनुप्रपेदे अवैदिकेइतिशब्दपरेप्लुतोऽप्लुतवत्स्यादित्यर्थकेनाप्लुतवदुपस्थितइतिसूत्रेणाप्लुतवत्त्वात्स्वरसंधिः ॥ ४५ ॥ यश्चयोगभाष्यप्रणेत्रापित्राआहूतःसर्वाहंभावशीलनाद्योगभूमेःप्रपंचैकभावंप्राप्तःसद्दक्षरूपःप्रत्याक्रोशंप्रातनोत् तथाचोक्तं यंप्रव्रजंतमनु पेतमपेतकृत्यंद्वैपायनोविरहकातरआजुहाव पुत्रेतितन्मयतयातरवोऽभिनेदुस्तंव्याससूनुमुपयामिगुरुंमुनीनांइतियोगमाहात्म्येनगमनागम नयोःसंभवात्परीक्षिदुपदेष्टृत्ववद्गौडपादोपदेष्टृत्वमपिनविरुध्यतइतिद्रष्टव्यं ॥ ४६ ॥ ॥४॥

तत्तस्मादेवंविधस्यज्ञानसमुद्रस्यभवतःकमलस्यसौहार्देनसादृश्येनहृद्यमेतत्पादद्वंद्वंदैवादस्मद्विधदीनदृष्टिविषयभूतंयदिस्यात्तर्हिएतद्भक्तस्या प्रमेयंभाग्यं ॥ ४७ ॥ शांतमनोवंतंत्वांद्रष्टुंअत्यंतोत्कंठागर्भितंममानसमासीत् ॥ ४८ ॥ किंचमत्कृतकारिकाब्जमुखसूर्याःभाष्यादयोनिबंधास्त्वया कृताइतिगोविंदमुखाच्छ्रुत्वाहर्षंप्राप्याद्यहेविद्वन्तवदृष्टिमार्गगोऽस्मि ॥ ४९ ॥ मांडूक्यगतभाष्ययुग्मंश्रुतिभाष्यंगौडपादीयकारिकाभाष्यंचेत्य

तत्तादृक्षज्ञानपाथोधियुष्मत्पादद्वंद्वंपद्मसौहार्दहृद्यं ॥ दैवादेतद्दीनदृग्गोचरंचेद्भक्तस्यैतद्भागधेयंत्वमेयं ॥ ॥ ४७ ॥ इत्याकर्ण्याथाब्रवीद्गौडपादोवत्सश्रुत्वावास्तवांस्त्वद्गुणौघान् ॥ द्रष्टुंशांतस्वांतवंतंममत्वांगाढोत्कं ठागर्भितंचित्तमासीत् ॥ ४८ ॥ कृतास्त्वयाभाष्यमुखानिबंधामत्कारिकावारिजनुःसुखार्काः ॥ श्रुत्वेतिगो विंदमुखात्प्रहृष्यद्दगध्वनीनोऽस्मितवाद्यविद्वन् ॥ ४९ ॥ इतिस्फुटंप्रोक्तवतेविनीतःसोऽश्रावयद्भाष्यमशेषम स्मै ॥ विशिष्यमांडूक्यगभाष्ययुग्मंश्रुत्वाप्रहृष्यन्निदमब्रवीत्तं ॥ ५० ॥ मत्कारिकाभावविभेदितादृङ्मां डूक्यभाष्यश्रवणोत्थहर्षः ॥ दातुंवरंतेविदुषांवरायप्रोत्साहयत्याशुवरंवृणीष्व ॥ ५१ ॥ सप्राहपर्यायशुक र्षिमीक्ष्यभवंतमद्राक्षमतिष्यपूरुषं ॥ वरःपरःकोऽस्तितथापिचिंतनंचित्तत्वगंमेस्तुगुरोनिरंतरं ॥ ५२ ॥

र्थः वि० ॥ ५० ॥ यदुवाचतदेवाह मत्कारिकाभावविभेदिनोस्तादृशयोर्मांडूक्यभाष्ययोःश्रवणेनोत्थितोहर्षःविदुषांमध्येश्रेष्ठायतुभ्यंवरंदातुंप्रो त्साहयति तस्माच्छीघ्रंवरंवृणीष्व इंद्र० ॥ ५१ ॥ एवंवरग्रहणायप्रेरितःसश्रीशंकरःप्राह भवंतंपर्यायेणरूपांतरेणोपलक्षितंशुकर्षिंशुकर्षेःपर्याय मितिवा सर्वात्मनाशुकर्षितुल्यमीक्ष्यभगवंतमकलिपूरुषंत्रियुगंपरमात्मानंविष्णुमेवाहमद्राक्षमतोऽस्मात्परोवरःकोपिनास्तितथापिहेगुरोमेचिं तनंसदैवचैतन्यतत्वविषयमस्त्वितिवरंदेहीत्यर्थः उ० ॥ ५२ ॥

तथेतिसगौडपादःप्राहेत्यनुकृष्यसंबंधनीयं अथापास्तमोहेचिरंजीविमुनावंतर्धिगतेसतिअसौएतंवृत्तांतंशिष्येभ्योमुदासंश्रावयंस्तांरात्रिमनैषीत् ॥ ५३ ॥ अथप्रातःकालेश्रीशंकरःशिष्यैःसहनित्यकर्तव्यंगंगायांविधिवत्संपाद्यतस्यास्तीरेनिदिध्यासनलालसोऽभूदेतस्मिन्नंतरेलोकवार्त्ताऽश्रूयत ॥ ५४ ॥ तामेवाह जंबूद्वीपमिति इंद्र० ॥ ५५ ॥ मंडपसंबंधिभिःचतुर्भिःद्वारैर्युक्तंतस्यादेव्यागेहंयस्मिन्गेहेसर्वज्ञपीठं यत्रा

तथेतिसोंतर्धिमपास्तमोहेगतेचिरंजीविमुनावथासौ ॥ वृत्तांतमेतंसमुदाश्रवेभ्यःसंश्रावयंस्तांक्षणदामनैषीत् ॥ ५३ ॥ अथद्युनद्यामुपसिक्ष्मींद्रोनिर्वर्त्यनित्यंविधिवत्सशिष्यैः ॥ तीरेनिदिध्यासनलालसोऽभूदत्रांतरेश्रूयतलोकवार्त्ता ॥ ५४ ॥ जंबूद्वीपंशस्यतेऽस्यांपृथिव्यांतत्राप्येतन्मंडलंभारताख्यं ॥ काश्मीराख्यंमंडलंतत्रशस्तंयत्रास्तेऽसौशारदावागधीशा ॥ ५५ ॥ द्वारैर्युक्तंमाडपैस्तच्चतुर्भिर्देव्यागेहंयत्रसर्वज्ञपीठं ॥ यत्रारोहेसर्वविस्सज्जनानांनान्येसर्वेयत्प्रवेष्टुंक्षमंते ॥ ५६ ॥ प्राच्याःप्राच्यांपश्चिमाःपश्चिमायांयेचोदीच्यास्तामुदीचींप्रपन्नाः ॥ सर्वज्ञास्तंद्वारमुद्घाटयंतोदाक्षानद्धंनोतदुद्घाटयंति ॥ ५७ ॥ वार्त्तामुपश्रुत्यसदाक्षिणात्योमानंतदीयंपरिमातुमिच्छन् ॥ काश्मीरदेशायजगामहृष्टःश्रीशंकरोद्वारमपावरीतुं ॥ ५८ ॥

रोहेसतिसज्जनानांमध्येसर्वज्ञोभवति सर्वज्ञादन्येसर्वेऽपियद्गेहंप्रवेष्टुमपिनक्षमंते यद्वा यदेवंभूतंतद्देव्यागेहमित्यन्वयः ॥ ५६ ॥ दाक्षादाक्षिणात्याःपिनद्धंतत्द्वारंनोद्घाटयंति ॥ ५७ ॥ तस्यावार्त्तायाइदंप्रमाणंमातुंइदंमानंनवेतिनिश्चेतुंइच्छन्तद्वारमुद्घाटयितुंकाश्मीरदेशायजगाम ॥ ५८ ॥

किलेतिप्रसिद्धं दाक्षिणात्यंद्वारंपिनद्धं यतइहभूमौदाक्षिणात्याविद्वांसोनैवसंतीतिकिंवदंतींजनश्रुतिंविफलांविधातुंजगाम आ० ॥ ५९ ॥ वादिसमूहाएवगजेंद्रास्तेषांदुर्मदघटाभिर्योगर्वस्तंसम्यक्कर्षतीतितथा सचासौश्रीमच्छंकरदेशिकेंद्रलक्षणोमृगेंद्रःसर्वार्थविदायात्यतोहेवादिदुःशठगजादूरंगच्छत किंकरोतीतिचेत्संन्यासलक्षणदंष्ट्रायुधोवेदांतलक्षणबृहद्वनाश्रयोवेदांतादन्यंद्वैतप्रतिपादकंशास्त्रलक्षणंवनंभक्षतीत्यध्वनिसंश्रावयन्नितिव्यवहितेनान्वयः शा० ॥ ६० ॥ करटतदांताद्गजगंडतटप्रांतभागादुद्वमितमदसौरभसारभरेणस्खलद्भिःअलि

द्वारंपिनद्धंकिलदाक्षिणात्यंनसंतिविद्वांसइतीहदाक्षाः ॥ तांकिंवदंतींविफलांविधातुंजगामदेवीनिलयायहृष्यन् ॥ ५९ ॥ वादिव्रातगजेंद्रदुर्मदघटादुर्गर्वसंकर्षणश्रीमच्छंकरदेशिकेंद्रमृगराडायातिसर्वार्थवित् ॥ दूरंगच्छतवादिदुःशठगजाःसंन्यासदंष्ट्रायुधोवेदांतोरुवनाश्रयस्तदपरंद्वैतंवनंभक्षति ॥ ६० ॥ करटतटांतवांतमदसौरभसारभरस्खलदलिसंभ्रमत्कलभकुंभजृंभितवलः ॥ हरिरिवजंबुकानतिमदरदयुतानकुजनानपिनाक्षिगोचरयतीहयतिपतिर्हंतकान् ॥ ६१ ॥ संश्रावयन्नध्वनिदेशिकेंद्रःश्रीदक्षिणद्वारभुवंप्रपेदे ॥ कवाटमुद्घाट्यनिवेष्टुकामंससंभ्रमंवादिगणोन्यरौत्सीत् ॥ ६२ ॥ अथाब्रवीद्वादिगणःसदेशिकंकिमर्थमेवंबहुसंभ्रमक्रिया ॥ यदत्रकार्यंतदुदीर्यतांशनैर्नसंभ्रमःकर्त्तुमलंतदीप्सितं ॥ ६३ ॥

भिःभ्रमतिगजकुंभेजृंभितंबलंयस्यसर्सिहोयथाक्षुद्रान्सृगालान्नगणयतितथेहलोकेयतिपतिर्मदलक्षणरदयुक्तान्निंदितानकुत्सितजनानपिनाक्षिगोचरयतिनगणयति यदिभवतोनजौभजजलागुरुर्मर्कटकं ॥ ६१ ॥ इत्येवंमार्गेसंश्रावयन्देशिकेंद्रःश्रीदक्षिणद्वारभूमिंप्राप्तवान् ततःकवाटमुद्घाट्यप्रवेष्टुकामंससंभ्रमंतंवादिगणोनिरोधितवान् उ० ॥ ६२ ॥ अथनिरोधनानंतरंसवादिगणोदेशिकमुवाच एवंबहुसंभ्रमाक्रियाकिमर्थंबहुसंभ्रमस्यक्रियाकरणंइतिवा यदत्रकार्यंतत्कथ्यतां यतस्तदीप्सितंकर्त्तुंसंभ्रमःसमर्थोनभवति वंश० ॥ ६३ ॥

यःकश्चित्परीक्षितुमायातिसकाममागच्छतुयतोहमखिलंवेद अण्वपिममाविदितंनास्ति वादिगणआह अमुनाप्रकारेणभवान्वक्तिचेत्त
र्हिहेसमुन्नतीच्छोपरीक्षांदत्वादेवतालयंव्रज इंद्र॰ ॥ ६४ ॥ एवंश्रुत्वापरीक्षांदातुमवस्थितंश्रीशंकराचार्यंप्रतिकणादमतेस्थितः एकंस्वीयंर
हस्यंपप्रच्छ तंविशिनष्टि द्रव्यगुणकर्मसामान्यविशेषसमवायाःषट्भावाइतिवादीरहस्यमेवदर्शयति संयोगभागिनःपरमाणुद्वयात्सूक्ष्मंद्व्यणुकं

यःकश्चिदेत्येतुपरीक्षितुंचेद्वेदाखिलंनाविदितंममाणु ॥ इत्थंभवान्वक्तिसमुन्नतीच्छोदत्वापरीक्षांव्रजदेवता
लयं ॥ ६४ ॥ षड्भाववादीकणभुङ्मतस्थःपप्रच्छतंस्वीयरहस्यमेकं ॥ संयोगभाजःपरमाणुयुग्माज्जातंहिसू
क्ष्मंद्व्यणुकंमतंनः ॥ ६५ ॥ यस्यादणुत्वंतदुपाश्रितंतज्जायेतकस्माद्वदसर्वविच्चेत् ॥ नोचेत्प्रभुत्वंतववक्तुमे
तेसर्वज्ञभाषांविहितांकथंते ॥ ६६ ॥ याद्वित्वसंख्यापरमाणुनिष्ठासाकारणंतस्यगतस्यमात्रा ॥ इतीरितेत
द्वचनंप्रपूज्यस्वयंनिवर्त्तिष्टकणादलक्ष्मीः ॥ ६७ ॥ तत्रापिनैय्यायिकआत्तगर्वःकणादपक्षाच्चरणाक्षपक्षे ॥
मुक्तेर्विशेषंवदसर्वविच्चेन्नोचेत्प्रतिज्ञांत्यजसर्वविस्त्वे ॥ ६८ ॥

जातमितिनोमतं ॥ ६५ ॥ द्व्यणुकाश्रितंअणुत्वंयत्स्यात्तत्कस्माज्जायेतेतिवदयदित्वंसर्वविच्चेत्तवप्रभुत्वंवक्तुमेतेतवशिष्यारचितांसर्वज्ञभाषांब्रुवं
ति नत्वर्थतःत्वंसर्वज्ञोसीत्यर्थः ॥ ६६ ॥ परमाणुद्वयनिष्ठायाद्वित्वसंख्यासातस्यद्व्यणुकगतस्याणुत्वस्यकारणमितिमात्राज्ञात्राश्रीशंकरेणक
थितेसतितद्वचनंप्रपूज्यकणादलक्ष्मीःस्वयमेवनिवृत्तिंगता उ॰ ॥ ६७ ॥ तदनंतरंतेषुमध्येगौतममताश्रयआत्तगर्वोनैय्यायिकआह कणा
दपक्षाद्गौतमपक्षेमुक्तेर्विशेषंवदयदित्वंसर्वज्ञोनोचेत्सर्वविस्त्वेप्रतिज्ञांत्यज ॥ ६८ ॥ ॥ ६ ॥

एवमुक्तआचार्यआह गुणसंबंधस्यात्यंतनाशेनभोवद्यास्थितिः साकणादपक्षेमुक्तिः तदीयेगौतमपक्षेतुसागुणसंगतेरत्यंतनाशेनभोवत्स्थि
तिरानंदसंवित्सहितामुक्तिरित्यर्थः ॥ ६९ ॥ पदार्थभेदस्तुस्फुटएवसिद्धः कणादमतेसप्तपदार्थागौतममतेतुषोडशते तथाचकणभुक्सूत्रं द्र
व्यगुणकर्मसामान्यविशेषसवायाभावाःसप्तपदार्थाः तथागौतमीयमपिप्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादज
ल्पवितंडाहेत्वाभासच्छलजातिनिग्रहस्थानानांतत्वज्ञानान्निःश्रेयसाधिगमइति सर्वजगन्निमित्तकारणभूतईश्वरस्तथाकणादपक्षवदेवइत्युदि

अत्यंतनाशेगुणसंगतेर्यास्थितिर्नभोवत्कणभक्षपक्षे ॥ मुक्तिस्तदीयेचरणाक्षपक्षेसानंदसंवित्सहिताविमु
क्तिः ॥ ६९ ॥ पदार्थभेदःस्फुटएवसिद्धस्तथेश्वरःसर्वजगद्विधाता ॥ सईशवादीत्युदितेभिनंद्यनैयायिको
पिन्यन्निरोधात् ॥ ७० ॥ तंकापिलःप्राहचमूलयोनिःकिंवास्वतंत्राचिदधिष्ठितावा ॥ जगन्निदानंवदस
र्वनित्वान्नोचेत्प्रवेशस्तवदुर्लभःस्यात् ॥ ७१ ॥ साविश्वयोनिर्वहुरूपभागिनीस्वयंस्वतंत्रात्रिगुणात्मिकास
ती ॥ इत्येवसिद्धांतगतिस्तुकापिलीवेदांतपक्षेपरतंत्रतामता ॥ ७२ ॥ ततोनदंतोन्यरुणन्सगर्वादत्वापरी
क्षांव्रजधामदेव्याः ॥ बौद्धास्तथासंप्रथिताःपृथिव्यांबाह्यार्थविज्ञानकशून्यवादैः ॥ ७३ ॥

तेसतिसईशवादीनैय्यायिकोपिनिरोधनान्न्यवृतन्निवृत्तः ॥ ७० ॥ ततस्तंसांख्यःप्राहमूलप्रकृतिःकिंस्वतंत्राजगत्कारणमुतचिदधिष्ठिते
तिसर्वज्ञत्वात्त्वंवद .नोचेत्प्रवेशस्तवदुर्लभःस्यात् ॥ ७१ ॥ एवमुक्तआचार्यआह साविश्वयोनिःसत्वरजस्तमोभिधगुणत्रयात्मिकास्वतं
त्रासतीबहुरूपभागिनीजगन्निदानमितितुकापिलीसिद्धांतगतिर्वेदांतपक्षेत्वस्याःपरतंत्रतामता ॥ ७२ ॥ ततोनदंतोन्यरुणन्निति ततस्त
दनंतरंतथैवबाह्यार्थविज्ञानकशून्यवादैःपृथिव्यांप्रथिताःसगर्वाःसौत्रांतिकवैभाषिकयोगाचार्यमाध्यमिकमतावलंबिनोबौद्धाः परीक्षांदत्वा
देव्याधामव्रजेतिनादंकुर्वंतोनिरोधंकृतवंतः ॥ ७३ ॥

यदित्वंदेवतालयंविविक्षुस्तर्हि द्विविधोयोबाह्यार्थस्तदंतरंत्वयावाच्यं विज्ञानवादस्यचभवतोवेदांतवादिनोमतात्किंविभेदकमितिब्रूहि ततःपरं
व्रज ॥ ७४ ॥ एवमुक्तआचार्यउवाच सौत्रांतिकःसर्वमपिवेद्यमनुमानगम्यंवक्ति वैभाषिकस्तुतत्सर्वंप्रत्यक्षगम्यंवक्ति तयोःसौत्रांतिकवै
भाषिकयोःपदार्थयोस्तयोःक्षणभंगुरतासमानावेदनवेद्यविषयोभेदोलिंगवेद्यत्वाक्षिवेद्यत्वरूपोविशेषःकियान्विद्यतइत्यर्थः ॥ ७५॥ विज्ञान

बाह्यार्थवादोद्विविधस्तदंतरंवाच्यंविविक्षुर्यदिदेवतालयं ॥ विज्ञानवादस्यचकिंविभेदकंभवन्मताद्ब्रूहित
तःपरंव्रज ॥ ७४ ॥ सौत्रांतिकोवक्तिहिवेद्यजातंलिंगाधिगम्यंत्वितरोक्षिगम्यं ॥ तयोस्तयोर्भंगुरताविशि
ष्टभेदःकियान्वेदनवेद्यभागी ॥ ७५ ॥ विज्ञानवादीक्षणिकत्वमेषामंगीचकारापिबहुत्वमेषः ॥ वेदांतवादी
स्[illegible]विदेकेत्यंगीचकारेतिमहान्विशेषः॥ ७६ ॥ अथाब्रवीद्दिग्वसनानुसारीरहस्यमेकंवदसर्वविच्चेत् ॥
यदा[illegible]योत्तरशब्दवाच्यंतत्किंमतेऽस्मिन्वददेशिकाशु॥ ७७ ॥ तत्राहदेशिकवरःशृणुरोचतेचेज्जीवादि
पंचकमभीष्टमुदाहरंति ॥ तच्छब्दवाच्यमितिजैनमतेप्रशस्तेयद्यस्तिबोद्धुमपरंकथयाशुतन्मे ॥ ७८ ॥

वाद्ययंविज्ञानानांक्षणिकत्वंबहुत्वंचांगीचकार अयंवेदांतवादीतुस्थिरमेकंज्ञानमित्यंगीचकारेतिमहान्विशेषः इंद्र० ॥ ७६ ॥ अथदि
गंबरानुसारीजगाद यदित्वंसर्वज्ञस्तर्ह्येकंगुह्यंवद किंतदितितत्राह कायइत्युत्तरशब्दोयेषांतैर्वाच्यंयदस्मिन्जैनमतेऽस्ति तत्किंहेदेशिकाशुव
द उ० ॥ ७७ ॥ तैर्जीवास्तिकायःपुद्गलास्तिकायोऽधर्मास्तिकायःआकाशास्तिकायः इतिशब्दैर्वाच्यंजीवादिपंचकमभीष्टमित्युदाहरंति
तत्पृष्टमुक्त्वाऽप्रशस्तेजैनमतेऽपरमपियत्ज्ञातुमास्तेतच्छीघ्रंवदेत्याह जैनमतइति इंद्र० ॥ ७८ ॥

एवंवेदबाह्येवादिगणेतुदत्तोत्तरेसतिकश्चिज्जैमिनिमतावलंब्यध्वरमीमांसकोजगाद जैमिनीयेमतेशब्दःकिंस्वरूपः किंशब्दार्थमाह द्रव्यंगुणो
वेति तथाचशब्दस्वरूपमुक्त्वाततोव्रज उ० ॥ ७९ ॥ नित्यावर्णाव्यापकाःश्रोत्रेंद्रियवेद्याः यद्रूपंशब्दजालंतच्चनित्यंद्रव्यंव्यापीतिजैमिनीया
अब्रुवन्इत्येवंतंजैमिनीयंदेशिकेंद्रःप्रोक्तवान् शालि० ॥ ८० ॥ सर्वेष्वपिशास्त्रेषुप्रत्युत्तरंदत्तवंतंतंश्रीशंकरंतेवादिनःसम्यगपूजयन् द्वारंसमु
द्घाट्यमार्गंचददुः तदनंतरमंतरभूमिभागंविवेश उ० ॥ ८१ ॥ हस्तेसनंदनमसाववलंब्यतद्विद्याभद्रासनमारोढुमनाश्चचालैतस्मिन्नंतरेविबुधा

दत्तोत्तरेवादिगणेतुबाह्येवभाणकश्चित्किलजैमिनीयः ॥ शब्दःकिमात्मावदजैमिनीयेद्रव्यंगुणोवेतितततो
व्रजत्वं ॥ ७९ ॥ नित्यावर्णाःसर्वगाःश्रोत्रवेद्यायत्तद्रूपंशब्दजालंचनित्यं ॥ द्रव्यंव्यापीत्यब्रुवन्जैमिनीया
इत्येवंतंप्रोक्तवान्देशिकेंद्रः॥ ८० ॥ शास्त्रेषुसर्वेष्वपिदत्तवंतंप्रत्युत्तरंतंसमपूजयंस्ते ॥ द्वारंसमुद्घाट्यददुश्चमा
र्गंततोविवेशांतरभूमिभागं ॥ ८१ ॥ पाणौसनंदनमसाववलंब्यविद्याभद्रासनंतदवरोढुमनाश्चचाल ॥
अत्रांतरेविधिवधूर्विबुधाग्रगण्यमाचार्यशंकरमवोचदनंगवाचा ॥ ८२ ॥ सर्वज्ञतातेऽस्तिपुरैवयस्मात्सर्वत्र
पर्यैक्षिभवान्नचेत्तु ॥ विरंचिरूपांतरविश्वरूपःशिष्यःकथंस्यात्प्रथिताग्रणीःसः ॥ ८३ ॥ सर्वज्ञतैकैवभवेन्न
हेतुःपीठाधिरोहेपरिशुद्धताच ॥ सातेस्तिवानेतिविचार्यमेतत्तिष्ठक्षणंत्वंकुरुसाहसंमा ॥ ८४ ॥

ग्रगण्यंश्रीशंकराचार्यमशरीरवाचाशारदाऽवोचत् इं० ॥ ८२ ॥ तेयदवोचन्तदुदाहरति सर्वज्ञतायांसंशयोनास्ति यस्मात्पूर्वमेवसर्वत्रपरीक्षांप्रा
प्तोऽसि यदिभवान्सर्वज्ञोनाभवत् तर्हिविरंचिःरूपांतरंयस्यसचासौविश्वरूपःप्रथितानामग्रणीः सशिष्यःकथंस्यात् उ० ॥ ८३ ॥ यद्य
प्येवंतथापिपीठाधिरोहेकेवलंसर्वज्ञतैवहेतुर्नभवेदपितुपरिशुद्धतापिसातेस्तिनवेत्येतद्विचारणीयमतःक्षणमात्रंत्वंतिष्ठसाहसंमाकुरु इं० ॥ ८४ ॥

एवंकोटिद्वयमुक्त्वोत्तरकोटिंसाधयति त्वंयतोयतिधर्मनिष्ठःसन्नंगनाःसम्यगुपभुक्ताकामकलारहस्यप्रवीणतापात्रमभूरतईदृशपदमारोढुमे
वंभूतस्यतवयोग्यताकथमपिनास्ति यतःसर्वज्ञतेवविमलतापीहारोहेहेतुः ॥ ८५ ॥ एवमुक्तःश्रीशंकरउवाच नेति अहमपिनसंदिहें
बायास्तवसंदेहोनास्तीतिकिमुवक्तव्यमित्यनुशयेनसंबोधयति हंबेति यत्तुत्वंचांगनाइत्यादितत्रशृणुयत्कर्मदेहांतरसंश्रयाद्विहितंतेनकर्मणाअ
न्योयंदेहोनलिप्येत लोकशास्त्रप्रसिद्धंचैतत् उ० ॥ ८६ ॥ सरस्वत्यापंडितैश्चपूजितोऽभवत् यथागार्ग्याकहोलादिभिश्चयाज्ञवल्क्यस्तद्व
त् ॥ ८७ ॥ अथभगवत्पादस्यशारदापीठवासंवर्णयति वादेचप्राडुःप्रकटतांगतोविनोदोयेषांतेचतेप्रतिकथनसुधियःप्रतिवादिपंडितामंडन

त्वंचांगनाःसमुपभुज्यकलारहस्यप्रावीण्यभाजनमभूर्यतिधर्मनिष्ठः॥ आरोढुमीदृशपदंकथमर्हतातेसर्वज्ञतेव
विमलत्वमपीहहेतुः॥८५॥नास्मिंश्छरीरेकृतकिल्बिषोहंजन्मप्रभृत्यंबनसंदिहेऽहं॥विधायिदेहांतरसंश्रयाद्यन्नते
नलिप्येतहिकर्मणान्यः॥ ८६ ॥ इत्थंनिरुत्तरपदांसविधायदेवींसर्वज्ञपीठमधिरुह्यननंदसभ्यः ॥ संभाजितोभ
वदसौविबुधैश्चवाण्यागार्ग्याकहोलमुखरैरिवयाज्ञवल्क्यः ॥ ८७ ॥ वादप्राडुर्विनोदप्रतिकथनसुधीवाददुर्वा
रतर्कन्यक्कारस्वैरधाटीभरितहरिदुपन्यस्तमाहानुभाव्यः ॥ सर्वज्ञोवस्तुमर्हस्त्वमितिवहुमतःस्फारभारत्यमोघ
श्लाघाजोघुष्यमाणोजयतियतिपतेःशारदापीठवासः॥८८॥

मिश्रप्रमुखास्तैःसाकंयोवादस्तत्रयेदुर्वारास्तर्काअविज्ञाततत्त्वेऽर्थेकारणोपपत्तितस्तत्वज्ञानार्थमूहस्तर्कइत्युक्तलक्षणास्तेषांन्यक्कारेतिरस्कारे
स्वैराभिःस्वतंत्राभिर्धाटीभिर्युद्धयात्राभिर्भरिताभिर्व्याप्ताभिर्हरिद्भिर्दिग्भिरुपन्यस्तंवर्णितंमहानुभाव्यंमहाप्रभावत्वंयस्यसत्वंसर्वज्ञोऽतएवबहु
भिःसमस्तगुणशालित्वेनात्यंतंसंभावितोऽस्मिन्पीठेवस्तुमर्होयोग्यइतिस्फारभारत्याविशालयावाचाऽमोघश्लाघयासफलप्रशंसयासर्वैर्जोघु
ष्यमाणोभृशंघुष्यमाणोयतिपतेःश्रीशंकरस्यशारदापीठवासोजयतिसर्वोत्कर्षेणवर्त्तते स्फारंयथातथाभारत्यासरस्वत्यामोघश्लाघयाजोघु
ष्यमाणइतिवा स्र॰ ॥ ८८ ॥

किंच दुर्दांतैरुद्धतैर्वादिभिःसहब्रह्मविद्यागुरोःश्रीशंकरस्यवादलक्षणद्यूतकथयादुंदुभेर्धिधिमेइतिशब्दादीक्षणचरणस्याक्षपादस्यगौतम
स्यकथाक्वापिप्रकर्षेणलीनाआसीत्तथाकापिलीकपिलकथाक्वापिलीनाआसीत्तथापूर्वमभग्नापिप्रभाकरोक्तिर्भग्नाआसीत् भट्टपादप्रवा
दःपरंकेवलंक्वचिदपिभूमावजनिप्रादुर्भूतः किंचअथतथापातंजलैःकाणादैश्चजनितंयन्मतंतदभिव्याप्यभेदवार्त्ताभूतवागनुचितवागासीत्
असमवागितिवाअसत्यवागितिवा भूतंक्ष्मादौपिशाचादौजंतौक्लीबंत्रिषूचिते प्राप्तेवृत्तेसमेसत्येदेवयोन्यंतरेनुगेइतिमेदिनी ॥ ८९ ॥ किंचपाखं

कुत्राप्यासीत्प्रलीनेक्षणचरणकथाकापिलीक्वापिलीनाभग्नाऽभग्नागुरूक्तिःक्वचिदजनिपरंभट्टपादप्रवादः॥
भूमावायोगकाणादजनितमतमथाभूतवाग्भेदवार्तादुर्दांतब्रह्मविद्यागुरुदुरुदकथादुंदुभेर्धिंधिमेऽतः॥८९॥
काणादःक्वप्रणादःक्वचकपिलवचःक्वाक्षिपादप्रवादःक्वाप्यंधायोगकंथाक्वगुरुरतिलघुःक्वापिभाट्टप्रघट्टः॥क्व
द्वैताद्वैतवार्त्ताक्षपणकविद्दतिःक्वापिपाखंडखंडध्वांतध्वंसैकभानोर्जयतियतिपतेःशारदापीठवासे ॥ ९० ॥
ततोदिविषदध्वनित्वरितमध्वराशावलीधुरंधरसमीरितत्रिदशपाणिकोणाहतः॥ अरुंधहरिदंतरंस्वरभरैर्भ्र
वुभिर्घनाघनघनारवप्रथमबंधुभिर्दुंदुभिः॥ ९१ ॥

घातात्मांधकारध्वंसैकसूर्यस्ययतिपतेःशारदापीठवासेजयतिसतिकाणादःप्रवादःक्वनक्वापीत्यर्थः क्वापिक्वचक्षपणकविद्दतिरार्हतव्या
ख्यानं ॥ ९० ॥ ततःशारदापीठारोहणानंतरंदिविषदध्वनिदेवमार्गेत्वरितंझटितियज्ञभुक्पंक्तिधुरंधरइंद्रस्तेनसम्यक्प्रेरितानांदेवानांहस्तप्रांतभा
गैराहतआसमंतात्ताडितोदुंदुभिर्भर्मंतःसिंधवःसमुद्रायैर्घनाघनोमेघस्तस्यघनीभूतानामारवाणांशब्दानांप्रथमबंधुभिस्तत्तुल्यैःस्वराणामतिश
यैर्हरितांदिशामंतरमंतरालमरुंधरोधितवान् पृथ्वी॰ ॥ ९१ ॥

अथानंतरंसुधाभुजोदेवाःपुलोमजायाःशच्याःसंयतकेशभरवहनंकतिचिद्दिवसानिअपगर्भकमपगतेषद्धिकसत्पुष्पंयथास्यात्तथागुरोःश्रीशंकरस्यशिरसिकल्पवृक्षपुष्पाणिहर्षेणाभ्यवर्षन्सम्यक्वृष्टिकृतवंतः पुष्पिताग्रा ॥ ९२ ॥ इत्येवमतितुष्टोमुनिःश्रीशंकरःसर्वज्ञपीठमध्युष्य तदुपरिस्थित्वातदपिनिजमतस्यगुरुतायैश्रैष्ठ्यायनपुनर्मानहेतोरथानंतरंकतिचनसुरेश्वरादीन्तच्छिस्यान्ऋष्यशृंगाश्रमादौविनिवेश्याथसमुनि

कचभरवहनंपुलोमजायाःकतिचिदहान्यपगर्भकंयथास्यात् ॥ गुरुशिरसितथासुधाशनाःस्वस्तरुकुसुमान्यथहर्षतोभ्यवर्षन् ॥ ९२ ॥ इतिमुनिरतितुष्टोध्युष्यसर्वज्ञपीठंनिजमतगुरुतायैनोपुनर्मानहेतोः ॥ कतिचनविनिवेश्याथर्ष्यशृंगाश्रमादौमुनिरथबदरींसम्प्रापकैश्चित्स्वशिष्यैः ॥ ९३ ॥ दिवसान्विनिनायतत्रकांश्चित्सचपातंजलतंत्रनिष्ठितेभ्यः ॥ कृपयोपदिशन्स्वसूत्रभाष्यंविजितत्याजितसर्वदर्शनेभ्यः ॥ ९४ ॥ नितरांयतिराडुडुराजकरप्रकरप्रचुरप्रसरस्वयशाः ॥ स्वमयंसमयंगमयन्नमयन्हृदयंसदयंसुधियांशुशुभे ॥ ९५ ॥

र्बदरींबदरिकाश्रमंकैश्चित्स्वशिष्यैःसहितःसन्प्राप मालिनी ॥ ९३ ॥ अथतत्रयत्कृतवांस्तदाह तत्रबदर्यांसचश्रीशंकराचार्योविजिताश्चतेत्याजितसर्वदर्शनाश्चइतितेतथाभूतेभ्यःपातंजलशास्त्रनिष्ठितेभ्यःकृपयास्वकृतंभाष्यमुपदिशन्सन्कानिचिद्दिवसानिव्यतिक्रांतवान् वसंतमालिका ॥ ९४ ॥ उडुराजस्यचंद्रस्यकिरणप्रकरःकिरणकलापस्तद्वत्प्रचुरःप्रसरोयस्यतथाभूतंस्वीयंयशोयस्यसयतिराट्श्रीशंकराचार्यःस्वमयमात्मप्रचुरंसमयंशास्त्रमवगमयदयंसुधियांहृदयंरमयन्सन्नितरांशुशुभे तोटकं ॥ ९५ ॥ ॥१॥

उपसंहरति एवंप्रकारैःकलिकल्मषघ्नैःशुभैश्चरित्रैरुज्वलकीर्तिराशेःशिवावतारस्यशंकरस्यद्वात्रिंशत्संवत्सराव्यतीयुरितियोजना आख्यानकी ॥ ९६ ॥ श्रीशंकराचार्योभाष्यादिकरणैःसुधियांकृतेनिरतिशयंश्रेयःसंपादितवानित्याशयेनाह भाष्यमिति सुशीलैःभूष्यंकलिमलविनाशकंकैवल्यस्यमूल्यंवेतनंभाष्यमकलिकृतं हंतेतिहर्षेकोमलामंत्रणेवा कुमतीनांनमस्कारैःकृतायापंडितानामहंतासासमंतात्खंडिता ए

एवंप्रकारैःकलिकल्मषघ्नैःशिवावतारस्यशुभैश्चरित्रैः ॥ द्वात्रिंशदत्युज्वलकीर्तिराशेःसमाव्यतीयुःकिलशंकरस्य ॥ ९६ ॥ भाष्यंभूष्यंसुशीलैरकलिकलिमलध्वंसिकैवल्यमूल्यंहंताहंतासमंतात्कुमतिनतिकृताखंडितापंडितानां ॥ सद्योविद्योतितासौविपथविमथनैर्मुक्तिपद्यानवद्याश्रेयोभूयोबुधानामधिकतरमितःशंकरःकिंकरोतु ॥ ९७ ॥ हंताशोभियशोभरैस्त्रिजगतीमंदारकुंदेंदुभामुक्ताहारपटीरहीरविहरन्नीहारताराानिभैः ॥ कारुण्यामृतनिर्झरैःसुकृतिनांदैन्यानलःशून्यतांनीतःशंकरयोगिनाकिमधुनासौरभ्यमारभ्यतां ॥ ९८ ॥

वंचविपथमथनैरसावनवद्यामुक्तिपद्यामोक्षपद्धतिःसद्योविद्योतिता तस्मादेवंकर्ताशंकरःइतोऽधिकतरंश्रेयःपुनःकिंकरोतुतस्याभावादित्यर्थः स्रग्ध० ॥ ९७ ॥ किंचहंतेत्याश्चर्येहर्षेवा त्रिजगत्यांत्रिलोक्यांयानिमंदारादीनितत्तुल्यैरासमंताच्छोभनैर्यशसांभरभारैरतिशयैर्वाकारुण्यामृतस्यनिर्झरःप्रवाहैःशंकरयोगिनासुकृतिनांदैन्यलक्षणोऽग्निःशून्यतांनीतोऽतस्तेनाधुनातःपरंसौरभ्यंसौगंध्यंकिमारभ्यतां तत्रेंदुभाश्चंद्रज्योत्स्नापटीरश्चंदनंहीरोवज्रंविहरन्नीहारश्चलतुषारं शार्दूल० ॥ ९८ ॥

किंच साधीयसाबाढतरेणातिदृढेनभूयसायशसादिगंतराणिआक्रांतानिव्याप्तानि अंतिमबाढयोर्नेदसाधावितिबाढशब्दस्यसाधादेशः बाढंदृढप्रतिज्ञयोरितिमेदिनी तथात्यंतमाश्चर्यरूपैरतिमानुषैःक्रीडितैर्दिगंतराणिविस्मेराणिविस्मयशीलानिरचितानि तथास्वभक्ताःस्वस्येप्सितभोगमोक्षप्राप्त्युपायैःकृतार्थीकृतास्तस्मादेवंकृतवतायतिराजेनाधुनेतोऽन्यत्सौजन्यंकिमातन्यतां ॥ ९९ ॥पारिकांक्षीश्वरोऽपितापसेश्वरोऽपि

आक्रांतानिदिगंतराणियशसासाधीयसाभूयसाविस्मेराणिदिगंतराणिरचितान्यत्यद्भुतैःक्रीडितैः ॥
भक्ताःस्वेप्सितभुक्तिमुक्तिकलनोपायैःकृतार्थीकृताभिक्षुक्ष्मापतिनाकिमन्यदधुनासौजन्यमातन्यतां
॥ ९९ ॥ पारिकांक्षीश्वरोथापदुद्धारकंसेवमानातुलस्वस्तिविस्तारकं ॥ पापदावानलातापसंहारकं
योगिवृंदाधिपःप्रापकेदारकं॥ १०० ॥ तत्रातिशीतार्दितशिष्यसंघसंरक्षणायातुलितप्रभावः ॥ तप्तो
दकंप्रार्थयतेस्मचंद्रकलाधरात्तीर्थकरप्रधानः॥ १०१ ॥

तपस्वीतापसःपारिकांक्षीत्यमरः केदारकंप्राप तंविशिनष्टि आपदुद्धारकंसेवमानानामतुलायाःस्वस्तेर्विस्तारकंपापदावाग्निपरितापस्यसंहारकं स्रग्विणी ॥ १०० ॥ तत्रकेदारकेअतिशीतेनपीडितस्यशिष्यसमूहस्यसंरक्षणार्थमतुलप्रभावःशास्त्रकर्तृषुप्रधानःश्रीशंकराचार्यः चंद्रकलाधरान्महादेवात् तप्तोदकंप्रार्थयामास उपजातिः ॥ १०१ ॥ ॥ १० ॥

कर्मंदिवृंदस्यभिक्षुसमुदायस्यपतिःश्रीशंकरस्तेनप्रार्थितःसन्गिरिशःशिवःसंतप्ततोयलहरींनदींस्वचरणारविंदात्प्रवर्त्तितवान् यातप्ततोयायतिनाथकी[illegible]विस्तारयंतीअद्यापितत्रसमुद्गच्छतिसमुल्लसतीतिवा वसंततिलका ॥ १०२ ॥ इत्येवंकृतदेवकार्ययेनतमेनमीशावतारंश्रीशंकरंतं[illegible]कैलासगिरिशृंगंप्रतिनेतुंब्रह्मेंद्रादयःसुरसमुदायप्रवराऋषिसंघैःसिद्धैश्चसहिताआजग्मुः मालिनी ॥ १०३ ॥ आगत्यय

कर्मंदिवृंदपतिनागिरिशोऽर्थितःसन्संतप्तवारिलहरींस्वपदारविंदात् ॥ प्रावर्तयत्प्रथयतीयतिना
थकीर्त्तिर्याद्यापितत्रसमुदंचतितप्ततोया ॥ १०२ ॥ इतिकृतसुरकार्यनेतुमाजग्मुरेनंरजतशिख
रिशृंगंतुंगमीशावतारं ॥ विधिशतमखचंद्रोपेंद्रवाय्वग्निपूर्वाःसुरनिकरवरेण्याःसर्षिसंघाःससि
द्धाः॥१०३॥विद्युद्वल्लीनियुतसमुदारब्ध्युद्धैर्विमानैःसंख्यातीतैःसपदिगगनाभोगमाच्छादयंतः॥
स्तुत्वादेवंत्रिपुरमथनंतेयतीशानवेषंमंदारोत्थैःकुसुमनिचयैरब्रुवन्नर्चयंतः ॥ १०४ ॥

तृक्तवंतस्तदाह विद्युद्वल्लीनांनियुतैर्लक्षैःसम्यगारब्धंयुद्धंयैःविद्युद्वल्लीनियुततुल्यैरितियावत् तथाभूतैःसंख्यारहितैर्विमानैःसपदितत्क्षणे आभोगंपूर्णंगगनमाकाशमाच्छादयंतोयतीशवेषंत्रिपुरमथनंमहादेवंस्तुत्वामंदारोत्थैःपुष्पसमुदायैरर्चयंतस्तेब्रह्मादयोदेवाअब्रुवन्नुक्तवंतः मंदाक्रांता ॥ १०४ ॥

यदुक्तंस्तदुदाहरति आद्यःसर्वकारणभूतोदेवःद्योतनात्मकःसकलदेवादिःजगद्रक्षणायकवलितंप्रसितंविषंसमुद्रमथनादुत्थंहालाहलाख्यंयेन
पुनश्चकामदहनःपुरारातिस्त्रिपुरसंहारकर्त्ताविश्वोत्पत्तिलयकारणंत्रिनेत्रोमहादेवोभवान्यदर्थंवेदमर्यादास्थापनार्थंभूमिप्राप्तस्तदधुनाहेसंस्त
तिनिबारकवृत्तंसंपन्नंतत्तस्मादधुनासपदिद्रागहोगिरिशास्मत्प्रियार्थंस्वर्गमायाहि शिख० ॥ १०५ ॥ विकसद्विनयप्रधानानांसुमनसां

भवःप्राद्योदेवःकवलितविषःकामदहनःपुरारातिर्विश्वप्रभवलयहेतुस्त्रिनयनः ॥ यदर्थंगां
प्राप्तोभवमथनवृत्तंतदधुनातदायाहिस्वर्गंसपदिगिरिशास्मत्प्रियकृते ॥ १०५ ॥ उन्मील
द्विनयप्रधानसुमनोवाक्यावसानेमहादेवेसंभृतसंभ्रमेनिजपदंगंतुंमनःकुर्वति ॥ शैलादिः
प्रमथैःपरिष्कृतवपुस्तस्थौपुरस्तत्क्षणाद्दुग्धाशारदवारिमुग्धवरटाहंकारहुंकारकृत् ॥१०६॥

देवानांवाक्यस्यांतेउन्मीलतोविनयप्रधानसुमनोवाक्यस्येतिवा महादेवेश्रीशंकरेस्वीकृतसंभ्रमेनिजपदंगंतुंमनःकुर्वतिसतिप्रमथैःरुद्रगणैःप
रिष्कृतंभूषितंवपुर्यस्यसशैलादिरुक्षानंद्याख्योऽग्रस्तत्क्षणाच्छ्रीशंकराचार्यस्याग्रेतस्थौ तंविशिनष्टि शरत्कालीनजलस्यदुग्धस्यवरटायाहंस
योषितश्चाहंकारस्यशौक्ल्याहंभावस्यहुंकारकृत्तेभ्योऽपिशुक्लइत्यर्थः हंसस्ययोषितद्वरटेत्यमरः शार्दूलविक्रीडितंछंदः ॥ १०६ ॥